শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ১২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমন্নারাযণীযম্ ॥

## দশক - ১২

*ৱরাহাৱতারৱর্ণনং ভূম্যুদ্ধরণৱর্ণনং চ*

স্বাযম্ভুৱো মনুরথো জনসর্গশীলো
দৃষ্ট্ৱা মহীমসমযে সলিলে নিমগ্নাম্।
স্রষ্টারমাপ শরণং ভৱদঙ্ঘ্রিসেৱা-
তুষ্টাশযং মুনিজনৈঃ সহ সত্যলোকে॥ ১॥

কষ্টং প্রজাঃ সৃজতি ময্যৱনির্নিমগ্না
স্থানং সরোজভৱ কল্পয তত্প্রজানাম্।
ইত্যেৱমেষ কথিতো মনুনা স্বযম্ভূ-
রম্ভোরুহাক্ষ তৱ পাদযুগং ৱ্যচিন্তীত্॥ ২॥

হা হা ৱিভো জলমহং ন্যপিবং পুরস্তা-
দদ্যাপি মজ্জতি মহী কিমহং করোমি।
ইত্থং ত্ৱদঙ্ঘ্রিযুগলং শরণং যতোস্য
নাসাপুটাত্ সমভৱঃ শিশুকোলরূপী॥ ৩॥

অঙ্গুষ্ঠমাত্রৱপুরুত্পতিতঃ পুরস্তাত
ভূযোথ কুম্ভিসদৃশঃ সমজৃম্ভথাস্তৱম্।
অভ্রে তথাৱিধমুদীক্ষ্য ভৱন্তমুচ্চৈ-
র্ৱিস্মেরতাং ৱিধিরগাত্ সহ সূনুভিঃ স্ৱৈঃ॥ ৪॥

কোসাৱচিন্ত্যমহিমা কিটিরুত্থিতো মে
নাসাপুটাত্ কিমু ভৱেদজিতস্য মাযা।
ইত্থং ৱিচিন্তযতি ধাতরি শৈলমাত্রঃ
সদ্যো ভৱন্ কিল জগর্জিথ ঘোরঘোরম্॥ ৫॥

www.prapatti.com

তং তে নিনাদমুপকর্ণ্য জনস্তপঃস্থাঃ
সত্যস্থিতাশ্চ মুনযো নুনুৱুর্ভৱন্তম্।
ততস্তোত্রহর্ষুলমনাঃ পরিণদ্য ভূয-
স্তোযাশযং ৱিপুলমূর্তিরৱাতরস্তৱম্॥ ৬ ॥

ঊর্ধ্বপ্রসারিপরিধূম্রৱিধূতরোমা
প্রোতক্ষিপ্তৱালধিরৱাঙমুখঘোরঘোণঃ।
তূর্ণপ্রদীর্ণজলদঃ পরিঘূর্ণদক্ষ্ণা
স্তোতৃঋন্ মুনীন্ শিশিরযন্নৱতেরিথ ত্বম্॥ ৭ ॥

অন্তর্জলং তদনুসঙকুলনক্রচক্রং
ভ্রাম্যত্তিমিঙ্গিলকুলং কলুষোর্মিমালম্।
আৱিশ্য ভীষণরৱেণ রসাতলস্থা-
নাকম্পযন্ ৱসুমতীমগৱেষযস্তৱম্॥ ৮ ॥

দৃষ্টৱাথ দৈত্যহতকেন রসাতলান্তে
সংৱেশিতাং ঝটিতি কূটকিটির্ৱিভো ত্বম্।
আপাতুকানৱিগণয্য সুরারিখেটান
দংষ্ট্রাঙকুরেণ ৱসুধামদধাঃ সলীলম্॥ ৯ ॥

অভ্যুদ্ধরন্নথ ধরাং দশনাগ্রলগ্ন-
মুস্তাঙকুরাঙকিত ইৱাধিকপীৱরাত্মা।
উদ্ধূতঘোরসলিলাজ্জলধেরুদঞ্চন
ক্রীডাৱরাহৱপুরীশ্বর পাহি রোগাত্॥ ১০ ॥

**********



www.prapatti.com